# प्रतिस्पन्दः

( षोडशे संस्कृतनाट्यमहोत्सवे प्रस्तुतानां रूपकाणां समीक्षा )

## चतुर्थी परिस्फुरत्ता




## राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
नवदेहली

मुख्यपरामर्शकः
**प्रो. परमेश्वरनारायणशास्त्री**
कुलपतिः

प्रबन्धपरामर्शकः
**प्रो. एस्. सुब्रह्मण्यशर्मा**
कुलसचिवः

सम्पादकः
**डॉ. मधुकेश्वरभट्टः**

## सप्तदशे संस्कृतनाट्यमहोत्सवे प्रदर्शनीयरूपकाणि

### ३०.११.२०१९ ( शनिवासरः )

| | | |
|---|---|---|
| के. विश्वनाथप्रणीतम्-भीष्मायणम् | सदाशिवपरिसरः, पुरी | अपराह्णे २.०० तः ३.०० |
| ऑगेटि-परीक्षितशर्मप्रणीतम्-करगिलविजयम् | श्रीरणवीरपरिसरः, जम्मू | अपराह्णे ३.३० तः ४.३० |
| एच्.वि. नागराजप्रणीतम्-उन्मत्तकीचकम् | क.जे. सौमेयापरिसरः, मुम्बई | सायम् ५.०० तः ६.०० |

### ०१.१२.२०१९ ( रविवासरः )

| | | |
|---|---|---|
| मोहनराकेशप्रणीतम्-आषाढस्यैको दिवसः | वेदव्यासपरिसरः, बलाहरः | पूर्वाह्णे ०९.३० तः १०.३० |
| शेक्सपियरप्रणीतम्-वासन्तिकास्वप्नम् | लखनऊपरिसरः, लखनऊ | पूर्वाह्णे ११.०० तः १२.०० |
| महाकविभासप्रणीतम्-कर्णभारम् | गङ्गानाथझापरिसरः, प्रयागराजः | मध्याह्ने १२.३० तः १.३० |
| डॉ. वी.राघवन् प्रणीतम्-अनारकली | श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः | अपराह्णे २.३० तः ३.३० |
| रमाकान्तशुक्लप्रणीतम्-अभिशापम् | भोपालपरिसरः, भोपालम् | अपराह्णे ४.०० तः ५.०० |
| कविवत्सराजप्रणीतम्-समुद्रमथनम् | गुरुवायूरपरिसरः, गुरुवायूर | सायम् ५.३० तः ६.३० |

### ०२.१२.२०१९ ( सोमवासरः )

| | | |
|---|---|---|
| महाकविभासप्रणीतम्-पञ्चरात्रम् | जयपुरपरिसरः, जयपुरम् | पूर्वाह्णे ०९.३० तः १०.३० |
| रविन्द्रनाथटैगौरप्रणीतम्-नृपः महिषी च | एकलव्यपरिसरः, अगरतला | पूर्वाह्णे ११.०० तः १२.०० |
| बलभद्रप्रसादशास्त्रिप्रणीतम्-सैरन्ध्रीनाटकम् | श्रीराजीवगान्धीपरिसरः, शृङ्गेरी | मध्याह्ने १२.३० तः १.३० |



## नान्दी वाक्

सामाजिकोऽयं मानवः संवेदनाशीलः। मानवस्य अन्तःकरणे निहिता सूक्ष्मसंवेदना एव काव्यरूपेण मूर्तस्वरूपं प्राप्नोति। काव्यरूपकादीनि मनुष्यस्य सूक्ष्मातिसूक्ष्मसंवेदनायाः मूर्तस्वरूपम् आदधति। रूपकाणि दर्शं दर्शं नटाः प्रेक्षकाश्च स्वयं रामीभूय कृष्णीभूय आनन्दम् अनुभवन्ति। रूपकादीनां लक्ष्यं स्वात्मानुसन्धानम्। रामादिवत् वर्तितव्यम्, न रावणादिवत् इति स्वात्मानुसन्धानेन सदाचारे प्रवृत्तिः, सदाचारप्रवृत्तौ स्वात्मनः समाजस्य च उन्नतिः। शृङ्गारादिनानारससमन्वितं रूपकम् एकं समाराधनं भवति। अत एव स्तौति कविकुलगुरुः कालिदासः एवम् –

**देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं**
**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते**
**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्॥**

संस्थानस्य अभिनवकार्यक्रमेषु अन्यतमः विद्यते अन्तःपरिसरीयनाट्यमहोत्सवः। संस्थानस्य परिसरीयच्छात्राणां कौशल–विकासाय प्रतिवर्षम् अन्तःपरिसरीयस्पर्धात्मकः नाट्यमहोत्सवः समाचर्यते। संस्थानेन अद्यावधि सप्तत्यधिकैकशतं रुपकाणि अभ्यनीयन्त। ऐषमः अन्तःपरिसरीयस्पर्धात्मकः सप्तदशः संस्कृतनाट्यमहोत्सवः अगरतलास्थे एकलव्यपरिसरे समायोजयिष्यते। समाराधनेऽस्मिन् समायोक्ष्यमाणानां सर्वेषां कुशीलवानां छात्राणां, विदुषाम् अध्यापकानाम्, भारतभुवः विभिन्नेभ्यः मण्डलेभ्यः समागमिष्यमाणानां नाट्यविशारदानां च स्वागतं करोमि। भारतसर्वकारेण प्रदत्तधनराशितः कार्यक्रमोऽयं प्रचलतीति संस्कृतपरिवारपक्षतः भारतसर्वकाराय आधमर्ण्यं प्रकटयामि।

**( प्रो. पी.एन. शास्त्री )**
कुलपतिः

## शुभाशंसनम्



मानवः सर्वदा आनन्दम् ईप्सति। आनन्दावाप्तिमार्गम् उपदिशन्ति शास्त्राणि काव्यानि च। काव्यशास्त्रयोः उपदेशे भेदेपि प्रयोजने भेदो नास्ति। दृश्यश्रव्यकाव्यभेदे रूपकं हि सर्वतोरम्यमिति न कोपि संशयलेशः। संगीतसाहित्याभिनयानां समपरिपाकं रूपकम् आपामरपण्डितम् अनिर्वचनीयम् आनन्दं सन्दिशति। रूपकाणां प्रमुखमुद्देश्यं मनोरञ्जनम्। यथा नाट्यशास्त्रप्रवर्तको मुनिर्भरतः ब्रूते –

**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रामजननं लोके नाट्यमेतद् भविष्यति॥**

देशस्य विविधभागेषु अवस्थिताः राष्ट्रियसंस्कृतसंस्थानस्य परिसराः संस्कृतविद्यायाः कमपि विशेषं सदैव प्रकटीकुर्वन्ति। एतेषु परिसरेषु अधीयानाः उपपञ्चसहस्रम् अन्तेवासिनः संस्कृतरूपकाणां प्रयोगपरम्पराम् अधिगच्छन्तु रङ्गमञ्चे निजप्रतिभाया आविष्काराय विकासाय च अवसरं लभन्तामिति धिया राष्ट्रियसंस्कृतसंस्थानेन प्रतिहायनं स्पर्धात्मकः अन्तःपरिसरीयः संस्कृतनाट्यमहोत्सवः समायोज्यते। महोत्सवेऽस्मिन् प्रतिज्ञायौगन्धरायणम्, कुन्दमाला, तण्डुलप्रस्थीयम्, लीलाभोजराजम् तथा अन्यानि प्राचीनार्वाचीनरूपकाणि ऐदम्प्राथम्येन परिसरीयच्छात्रैः अभ्यनीयन्त। एतासु प्रस्तुतिषु भासभवभूतिकालिदासादीनां अभिराजराजेन्द्रमिश्र–राधावल्लभत्रिपाठिप्रभृतीनां तथा नैकेषामज्ञातप्रायाणां दुर्लभप्राचीनाधुनिकरूपकाणाम् आविष्कारः विहितोस्ति। ऐषमः अन्तःपरिसरीयः स्पर्धात्मकः सप्तदशः संस्कृतनाट्यमहोत्सवः त्रिपुराराज्यस्थे मातुः त्रिपुरसुन्दर्याः पादतले विराजमानस्य एकलव्यपरिसरे समायोजयिष्यते। गते हायने नाट्यमहोत्सवे छात्राणामभिनयकौशलवर्धनाय परिष्काराय च माननीयकुलपतिभिः आरचिता समितिः प्रतिरूपकं सूक्ष्मैक्षिकया परिशील्य स्वाभिप्रायं प्राचीकटत्। तस्याः अभिप्रायाणां संग्रहः एव 'प्रतिस्पन्दः' इति नाम्ना पुस्तिकाकारेण प्रकाश्यते। अयं प्रतिस्पन्दः छात्राणां परिष्कारशेमुषीं संवर्धयेत् इति आशासे। हर्षमानसेन सप्तदशे नाट्यमहोत्सवे भागमोढुं समागतान् कुशीलवान् छात्रान् विदुषः अध्यापकान् च शुभकामनाभिः सभाजयामि।

**( प्रो. एस्. सुब्रह्मण्यशर्मा )**
कुलसचिवः

# निवेदनम्

मानवहृदयम् अनुभूतीनाम् आगरम्। योस्माकं हृदये आनन्दस्य शोकस्य करुणस्य वीरस्य रौद्रस्य वा भावम् अकस्मात् जागरयति स रसः। एतद्दृशरसस्यन्दनवाक्प्रबन्धं काव्यम् इत्यभिधीयते विज्ञैः। काव्यं न केवलमानन्दं प्रददाति किन्तु जीवनमपि परिष्करोति। दृश्यश्रव्यात्मके काव्यप्रभेदे नाटकं हि अनुपमं रमणीयं साहित्यम्। संगीतस्य साहित्यस्य अभिनयस्य च सममिश्रणं नाटकेषु दृश्यते। घनान्धकारे दीप इव जीवनस्य लक्ष्यं संदिशति, दण्डधर इव अधर्ममार्गप्रवृत्तानां धर्मपथं प्रदर्शयति, शुद्धसलिलमिव मनोकालुष्यं निर्हनिष्यति, अब्जिनीपतिरिव विदुषामपि वैदुष्यं विशदयति, मानवसहजकामक्रोधमदमत्सराद्यवगुणान् परिमार्ज्य आबालपण्डितम् अनाख्येयम् आनन्दं संददाति नाटकम्। यथा उवाच मुनिर्भरतः –

**धर्मोऽधर्मप्रवृत्तानां कामः कामोपसेविनाम्।**
**निग्रहो दुर्विनीतानां विनीतानां दमक्रिया।।**

अत एव "काव्येषु नाटकं रम्यम्", "नाटकान्तं साहित्यम्", इति नाटकानि प्रशंसन्ति विज्ञाः। यदा नाटकेषु भावतत्त्वानां प्रधानता तत्रैव काव्योचितसौन्दर्याणां समायोजनं, तथा वस्तु, पात्रम्, रसः, अभिनयः, वृतिः इति पञ्चतत्त्वोपेतं नाटकं परिपूर्णं भवति।

राष्ट्रियसंस्कृसंस्थानस्य अभिनवप्रकल्पेषु अन्तःपरिसरीयः नाट्यमहोत्सवः अन्यतमः। अस्मदन्तेवासिनां प्रतिभाप्रसाराय बहुभ्यः वर्षेभ्यः स्पर्धारूपेण कदाचित् कौमुदीमहोत्सवनाम्ना कदाचित् वसन्तोत्सवनाम्ना सम्प्रति नाट्यमहोत्सवनाम्ना समायोज्यते। कार्यक्रमोऽयं समग्रे विश्वे नाट्यविद्यायां भरत इव विश्रुतानां पणिक्करमहोदयानां तत्सदृशविदुषाम् आशीराशिं समाप्नोत्। अद्यावधि राष्ट्रियसंस्कृतसंस्थानस्य परिसरच्छात्रैः सप्तत्यधिकैकशतं नाटकानि प्रदर्शितनीति हर्षप्रकर्षस्य विषयः। भासभवभूतिकालिदासप्रभृतीनां प्राचीनानां कवीनां नाटकानि तथा राधावल्लभ–त्रिपाठि–रमाकान्तशुकलाभिराजराजेन्द्रमिश्रादीनाम् आधुनिककवीनामपि नाटकानि मञ्चे अभिनीतानि।

ऐषमः स्पर्धात्मकः अन्तःपरिसरीयः सप्तदशः नाट्यमहोत्सवः जगज्जनन्याः त्रिपुरसुन्दर्याः पादतले विराजमाने राष्ट्रियसंस्कृतसंस्थानस्य एकलव्यपरिसरे समायोज्यते। देशस्य पूर्वोत्तरभागे विद्यमाने एकलव्यपरिसरे समायोजनस्य इदमेव मुख्यं लक्ष्यं नाटकमाध्यमेन संस्कृतभाषायाः प्रचारः प्रसारश्च। अस्मिन् महोत्सवे प्राचीनार्वाचीननाटकानां तथा अनूदितनाटकानां समागमः भवतु इति संस्थानस्य कुलपतीनाम् आशयः। तदनुगुणं वी.राघवन्–महोदयैः विरचितं प्रसिद्धं नाटकम् अनार्कली, ऋषिणा रबीन्द्रनाथटेगोरमहोदयेन प्रणीतं श्रीकृष्णाचार्येण अनूदितं नाटकं नृपः महिषी च, प्रसिद्धाङ्ग्लनाटककारेण शेक्सफियरेण निबद्धं मिड समर नाईट ड्रीम इत्यस्य संस्कृतानुवादः वासन्तिकास्वप्नम्, सुप्रसिद्धेन हिन्दीभाषानाटककारेण उपनिबद्धं डॉ. कौशिक कुमारेण अनूदितं नाटकम् आषाढस्यैको दिवसः इति च नाटकानि अस्मिन् महोत्सवे आस्माकीनैः कुशीलवैः छात्रैः अभिनेष्यन्ते। षोडशे संस्कृतनाट्यमहोत्सवे विद्वद्भिः सूक्ष्मदृष्ट्या परिशीलितम् अभिप्रायाणां सङ्ग्रहः प्रतिस्पन्दः इति नाम्ना पुस्तकाकारेण संस्थानस्य माननीयकुलपतीनां कुलसचिवानां च अनुज्ञया प्रकाशयिष्यते। नूनम् अयं छात्राणां परिष्कारपथं प्रदर्शयति।

**( डॉ. मधुकेश्वरभट्टः )**

सम्पादकः

# राष्ट्रिय-संस्कृत-संस्थानस्य अन्तःपरिसरीया अनुपमा मनोहारिणी च षोडशी संस्कृत-नाट्यस्पर्धा

-डॉ. बलदेवानन्द-सागरः

ये नाम संस्कृतस्य अभिमानिनोनुरागिणः छात्राः शिक्षकाः कर्मकराः विद्वान्सश्च, ते सर्वे तु जानन्ति एव यत् २००४-मिते ख्रिष्ट्रीय-वर्षे मार्च-मासे [३-४-दिनयोः] प्रप्रथमं वसन्तोत्सवेन आरब्धा राष्ट्रिय-संस्कृत-संस्थानस्य अन्तःपरिसरीया संस्कृत-नाट्यस्पर्धा, ततः प्रभृति अनारतं प्रतिवर्षमेषा आयोज्यते। सा च ऐषमः [२०१९] मार्च-मासे [८-९-१०-दिनेषु] षोडशी सती केरल-राज्ये त्रिश्शूर-जनपदे गुरुवायूरपरिसरे सोत्साहं सोल्लासं हर्ष-प्रकर्ष-पुरस्सरं च नव-निर्मिते सद्यःसमुद्घाटिते च प्रेक्षागृहे-रूपलावण्यवती षोडशीव भाव-विभावानुभाव-सम्पन्ना परम-सुन्दरीव प्रभाविनी सिद्धा।

संस्थानस्य [मानित-संस्कृत-विश्वविद्यालयस्य] विभिन्नानां राष्ट्र-व्यापि-परिसराणां छात्रैः अस्यां त्रिदिवसात्मिकायां षोडश्यां संस्कृत-नाट्यस्पर्धायाम् आहत्य एकादश संस्कृत-रूपकाणि प्रयुक्तानि।

प्रथम-दिवसे [०८-०३-२०१९] सोपचारं मङ्गल-दीप-प्रज्वालनोद्घाटन-विधेः अनन्तरम् समारब्धायाम् अस्यां संस्कृत-नाट्यस्पर्धायाम् सर्व-प्रथमं गुरुवायूर-परिसरीयैः छात्रैः अद्भुतो नवीनश्च पूर्वरङ्ग-प्रयोगः प्रदर्शितः, यो हि नयन-रम्यः भावगम्यः सौम्य-सङ्कल्पना-कमनीयः विविध-चारु-चारी-संयुतः कुशल-कुशीलवानां सामूहिकाभिनय-सौष्ठव-सम्पन्नः झटिति दृश्य-परिवर्तन-प्रयोग-प्रवीणः सुदीर्घ-कालीन-कथा-प्रकथन-पूर्णः वाल्मीकि-व्यास-भास-कालिदास-कृतीनां संक्षिप्तिका-प्रदर्शन-पुरस्कृतः प्रावर्तत, अपि च पूर्वरङ्गान्ते, अस्य नाट्योत्सवस्य परम्परानुसारम् अत्र, नातिचिरं प्रयोज्यमानानाम् एकादश-रूपकाणां संक्षिप्तिका अपि मनोहारिण्या रीत्या दृश्याङ्किता विहितासीत्।

तर्हि, आगच्छन्तु नाट्यरसास्वादकाः सहृदयाः रङ्गकर्मणि रुचिमन्तोत्रभवन्तो भवन्तश्च विबुधाः! अवलोकयेम वयं समीक्षा-माध्यमेन एतेषाम् एकादश-रूपकाणां प्रदर्शन-कौशलम्।

**[ 1 ] तापस-वत्सराज-चरितम्**

अनङ्गहर्षेण नवम-शताब्द्याः उत्तरार्धे [८५०-ख्रिष्ट्रीय-वर्षे] प्रणीतं 'तापस-वत्सराज-चरितम्' इति षडङ्कं नाटकं जम्मू-स्थितस्य श्रीरणवीर-परिसरस्य छात्रैः अभिनीतम्। अस्मिन् हि राज्ञः वत्सराजस्य उदयनस्य वासवदत्तायाः च सुप्रसिद्धा प्रणय-कथा गुम्फितास्ति। गर्भान्तरीया कथा तु राजनीति-कुशलस्य अमात्यस्य यौगन्धरायणस्य एवास्तीति विदाङ्कुर्वन्तु सुधियः। नाटकस्य निर्देशनं सामान्यतया समुचितमासीत्, यथा घट्यातु-[plastic]-आस्तरणेन आच्छाद्य राज्ञः दुःस्वप्नस्य प्रतीकात्मकं दृश्यम्। परम् एतदर्थम् अस्य दृश्यस्यारम्भे, अभिनेता नृपः सहृदयान् दर्शकान् प्रति पादौ स्थापयित्वा [प्रदर्श्य] स्वपिति, एतच्च सुरुचि-व्याघातकं नाट्य-शास्त्रीय-प्रयोग-प्रतिकूलञ्चेति वक्तुं शक्यते। अत्र कुशीलवेन किञ्चित् तिरञ्चीभूय स्थातव्यमस्ति। नाट्य-प्रयोगेस्मिन् नान्दी-प्रस्तुतौ भरत-वाक्योच्चारणावसरे विहितो वृन्दात्मको दृश्य-बन्धो रमणीयः। अत्र पात्रत्रयेण हस्तयोः दीपान् धृत्वा भावमयं चित्रं समुपकल्पितम्। तथापि यथा वयं जानीमः-आङ्गिकः, वाचिकः, आहार्यः, सात्त्विकश्चेति चतुर्विधो भवत्यभिनयः























भरत-नाट्य-शास्त्रानुसारेण। अस्य नाटकस्य कुशीलवैः स्वीय-योग्यतानुरूपं समीचीनं प्रयतितं, तथापि नाट्य- प्रयोगेस्मिन्वाचिकाहार्येति पक्ष-द्वये समधिकम्अभ्यसनीयम् अवशिष्यते। वाचिकाभिनयार्थं, प्रयोक्ष्यमाणस्य नाटकस्य पूर्वाभ्यासावसरे आहोस्वित् तत्पूर्वं दिवस-द्वयात्मिका वा दिन-त्रयात्मिका एका कार्यशाला आयोज्यते चेत् नूनं तत् भद्रत्वाय कल्पिष्यते। अत्र एकस्मिन् दृश्ये नारी-पात्र-त्रयस्य आहार्यं [परिधानं] प्रायेण तुल्यमेव [रक्त-वार्णिकं] आसीत्। आहार्ये अत्रैक-रूपताकारणात् रस-साधारणीकरणेपि व्याघातो जायते- इत्यस्मदीयानुभूतिः। एवं सत्यपि, आपाततः छात्राणां प्रयासः नूनं प्रशंसनीयः।

**[ २ ] भारतविजयम्**

हिमाचलप्रदेशस्य सोलन-नगरनिवासिना मथुराप्रसाद-दीक्षितेन प्रणीतं 'भारतविजयम्' इति नाटकं, हिमाचल-प्रदेशस्य बलाहर-स्थितस्य श्रीवेदव्यास-परिसरस्य विद्यार्थिनोत्र अभिनीतवन्तः। १९३७-मितेख्रिष्ट्रीय-वर्षे विरचितं नाटकमिदं तदा आङ्ग्ल-शासकैः प्रतिबद्धमासीत्, तच्च स्वाधीनता-प्राप्तेः अनन्तरमेव प्राकाश्यमागतम्। नाटकेस्मिन् भारतस्य स्वाधीनता-प्राप्तये विधीयमानाः नाना प्रयासाः वर्णिताः प्रदर्शिताश्च। नाटकाराम्भे प्रस्तूयमानायामेव नान्द्यां विपरिवर्तिते प्रकाशात्मक-पटे [through reverce-&reflection] दृश्य-बन्धं प्रदर्श्य निर्देशकः स्वीय-प्रावीण्यं साधितवान्, अपि च छायादृश्येन हिरण्यकशिपोः वधं साकारीकृत्य "भवतु भारतविजयम्, भवतु भारतविजयम्" चेति समाघोष-माध्यमेन नाट्य-सूचिकां सङ्केतितवान्।

अत्रेदं वक्तुं पारयामः यत् पूर्वतन-वर्षीयाणां नाट्य-स्पर्धानाम् अपेक्षया साम्प्रतं प्रयोक्ष्यमाणस्य प्रत्येकमपि नाटकस्य नान्द्याः समुपस्थापने नृत्यकलायाः [choreography] प्रदर्शनं सम्यक्तया विधीयते। एतत्तु नूनं हर्षानुभूतिविवर्धकम्। नान्द्याः अनुपदं त्रि-चतुर्दृश्य-बन्धेन भारतस्य तत्कालीनां सामाजिकीं स्थितिं प्रदर्श्य, 'अहं जाने सकलं प्रपञ्चम्' इति वाचिकाधारेण प्रतीप-चरित्र-द्वय-द्वारा भावात्मकः सङ्केत-सन्देशः निर्देशकेन कुशलतया प्रयुक्तः। अस्यामेव प्रस्तुतौ एतादृशः अपरो नूतनः दृश्य-प्रयोगः - 'आहत्य पञ्चभिः अभिनेतृभिः सम्भूय अनुक्रमं सम्वादमुच्चार्य वर्तुलाकारेण परिभ्रमद्भिः' विहितः। नाट्य-प्रविधेः उत्तमेयं शैली यत्र निर्देशकः सहजतया स्वीयं हार्दं कथ्यं वर्णयितुं पारयति। अपराण्यपि कानिचित् दृश्यानि, यथा गोमांस-गोलिका-प्रयोग-विरोधः, झांसी-राज्ञ्याः लक्ष्मीबाई-महाभागायाः विरोधाभिव्यक्तिः, वन्दे मातरमुच्चार्य न्यायाधीशस्य निर्णयोद्घोषणा, महात्मगान्धिनः प्रतिमूर्ति-दृश्यम्, अवज्ञान्दोलन-जलियावाला-बाग-भाङ्गडा-नृत्य-कारागृह-प्रभृतीनि, सुतरां हृदयावर्जकाणि सन्ति। अस्य नाटकस्य आहार्यविषयेपि किमपि वक्तव्यम्। आङ्ग्लाधिकारिणः आहार्यं [परिधानं] नूनं प्रशंसार्हम्। आहत्य वक्तुं शक्यते यत् बलाहर-स्थितस्य श्रीवेदव्यास-परिसरस्य विद्यार्थिनामियं प्रस्तुतिः सहृदयानां रससाधारणीकरणे सफला सिद्धा। एतदर्थं तेषां कृते सर्वविधं शुभं कामयामहे।

**[ ३ ] दरिद्रचारुदत्तम्**

भासनाटक-चक्रे चारुदत्त-नाटकम् अन्तिमं प्रौढं च आमन्यते। वसन्तसेना-चारुदत्तयोः प्रेमकथा-पूर्णम् अपूर्वं च नाटकमिदं सरलं सुबोधं भावगम्भीरं च वर्तते। मुम्बई-स्थितस्य श्रीक.जे.सौमय्या-परिसरस्य विद्यार्थिनोत्र दरिद्रचारुदत्तम् अप्रतिमरीत्या अभिनीतवन्तः।

नाटकारम्भे, नान्दी-समकालमेव वसन्तोत्सवस्य रमणीयं दृश्यं श्रुतिमधुरेण संगीतकेन रागेण सम्प्रस्तूयते। अवसरेस्मिन् मञ्चसज्जा सौम्या प्रकाश-प्रभावश्च सुखदः प्रतीयते। रदनिका-विदूषकाभ्यां सह विट-शकारयोः अद्भुतो दृश्य-बन्धः गति-विगतिद्वारा आङ्गिकाभिनयस्य सम्भावनाः सुतरां विवर्धयति। 'उदयति हि शशाङ्कः' इति श्लोक-गायनावसरे चन्द्रमसः प्रदर्शनेन मञ्चः सुखदः प्रतिभाति। शर्विलकस्य चौर्य-दृश्यं कुशीलव-वृन्देन प्रभावितया रूपायितम्। परञ्च, द्यूत-क्रीडायाः दृश्यावसरे निर्देशकः अधिकतरं स्वातन्त्र्यम् अङ्गीकरोति - यथा शर्विलकस्य प्रतिमाभवनं, मञ्चोपरि स्थितानां सर्वेषां नटानां च नर्तनम्। मध्ये मध्ये संगीत-स्वरः उग्रोभवति यो हि सहृदयानां रस-साधारणीकरणे बाधायते। इत्थम् इत्थम् इत्थम् इत्थम् ... वधूपदेन अलङ्करोमि - इति सम्वादः वसन्तसेनायाः चारित्रिकम् औदार्यं ख्यापयति। आपाततः वक्तुं शक्यते यत् मुम्बई-स्थितस्य श्रीक.जे.सौमय्या-परिसरस्य प्रस्तुतिरियं शिवरञ्जिनी-मियाँकीमल्हार-यमन-प्रभृति-रागरञ्जिता सती सहृदय-दर्शकाणां चित्तानि चोरयितुं सफला सिद्धा।





**[ ४ ] शान्तामङ्गलम्**

अस्याः त्रिदिवसात्मिकायाः संस्कृत-नाट्यस्पर्धायाः द्वितीय-दिवसे [०९-०३-२०१९] कविवरेण श्रीरामेश्वर-दयालुना किञ्चित् रामायणीय-तथ्यम् आधृत्य विरचितं सप्ताङ्कपूर्णं 'शान्तामङ्गलम्' इत्याख्यं नाटकं जगन्नाथ-पुर्याः श्रीसदाशिव-परिसरस्य छात्रैः प्रयुक्तम्। रामायणे पुष्कल-वर्णनं प्राप्यते। तदनुसारेण राज्ञा रोमपादेन पालितायाः सुमित्रा-दशरथयोः सुतायाः शान्तायाः विवाहः विभाण्डक-मुनेः पुत्रेण ऋष्य-शृङ्गेन समभवत् इति कथानकमाधृत्य प्रणीतेस्मिन् रूपके दुर्भिक्षस्य अनावृष्टेः राक्षस-सैनिक-युद्धस्य यज्ञानुष्ठानस्य च विस्तृत-दृश्यानि प्रयुक्तानि। राक्षस-सैनिक-युद्ध-दृश्ये अन्यतम-सैनिकस्य फेन-[foam]-खड्ग-मुष्टिः भग्ना भवति-अतः आहार्य-मञ्च-सामग्री-विषये कुशीलवैः सावधानैः भाव्यमिति समीक्षकाणां सार्वकालिकः परामर्शः।





नान्द्यन्ते मञ्चोपरि उपस्थापितेषु अयोध्या-नगर्याः दृश्येषु वृषभान् चालयन्तः कृषकाः, गृहकार्येषु निरताः गृहिण्यः, मल्लशालायाम् अभ्यास-व्यापृताः मल्लाः, सन्ध्यावन्दनादि-कर्मरताः द्विजाः - प्रभृतीनि चान्यतमानि सन्ति। एतदर्थं निर्देशकेन दृश्य-संयोजनं महता प्रयासेन प्रकल्पितमिति वक्तुं शक्यते। परञ्च कुत्रचित् एतेषां दृश्यानाम् अनावश्यकं दीर्घत्वं दर्शकाणां मानसानि प्रतोदयति। नाटकस्य कथा-प्रवाहः अतिदीर्घ-दृश्याङ्कैः बाध्यते, अतः दर्शकाः अन्यमनस्काः भवन्ति।

ततः परं राक्षसानाम् उत्पात-दृश्यानि प्रस्तुतानि। 'अहं दुर्भिक्षः' 'अहम् अनावृष्टिः' इति पात्र-द्वयस्य सम्वाद-माध्यमेन राज्यस्य तात्कालिकीं स्थितिं प्रदर्शयितुं निर्देशकेन प्रयतितम्। 'मधूकं गृह्यताम्', 'घृतं गृह्यताम्', 'पानीयं गृह्यताम्' चेत्यादि- दृश्याभिनये अतिरेकः स्पष्टो दृग्गोचरीभूयते। मध्ये मध्ये करुण-रसोद्रेकार्थं "शिवरञ्जिनी"-रागस्य वादनमपि वितानितम्, तच्च सुखदमिति अनुभूयते। अन्ते च, ऋष्य-शृङ्गस्य प्रवेशः, तस्मै झटिति शान्तायाः हस्त-प्रदानम्, भरतवाक्यं चेति सहसा नाटकान्तः किञ्चित् अस्वाभाविकं प्रतीयते। तदाहं चिन्तयन्नासं यत् किमत्र शान्ता-ऋष्यशृङ्गयोः मध्ये कश्चन शुभङ्करः सम्वादः आवश्यकः अभविष्यत्, समधिकं प्रभावि दृश्यम् अवर्तिष्यत। भवतु, प्रस्तुतिरेषा दृढतया किञ्चित्-दृश्य-परिष्कार-पुरस्सरं इतोऽपि समधिका रुचिरा अवर्तिष्यत।









**[ ५ ] कुन्दमाला**

महाकवेः दिङ्नागस्य रचना ‘कुन्दमाला’ सुप्रसिद्धं छायानाटकं वर्तते। लक्ष्मणः भागीरथीदर्शन-व्याजेन सीतां वनप्रान्ते परित्यज्य निवर्तते। मुनिदारकेभ्यः एतद्वृत्तं श्रुत्वा वाल्मीकिः तत्रागच्छति, सीताञ्च स्वीयाश्रमं नयति। आश्रमे निवसन्त्याः सीतायाः कुश-लवाख्यौ पुत्रौ जातौ। उत्तरप्रदेशस्य लखनऊ-स्थितस्य परिसरस्य छात्रैः ‘कुन्दमाला’ इति छायानाटकमिदम् अत्र प्रयुक्तम्।

‘हेरम्ब-पाद-पान्सवः’ इति नान्द्यन्ते सीता-लक्ष्मण-समारूढं रथं चालयन् सुमन्तः प्रविशति। अत्र रथस्य संकल्पना रुचिरा विहिता परञ्च रथोयं स्थिरः प्रदर्शितः। सर्वेषां नटानाम् आङ्गिकाभिनय-पुरस्सरं गतियुतो रथः प्रदर्श्यते चेत्, प्रभावकं दृश्यम् अभविष्यत्। भागीरथ्याः दृश्याङ्कनं शोभनतरं जातम्। अत्र सीता संवदति यत् ‘कुन्दमालां’ समर्पयामि। रथस्य सङ्कल्पनामिव ऋषेः कुटीरस्य प्रतिकृतिः [replica] अपि रुचिरा सिद्धा। गङ्गा-गोमत्योः दृश्यमपि सम्यक् व्यवस्थापितम्, परञ्च मध्ये मध्ये नैकत्र कथा-प्रवाहः अवरुद्ध-गतिकः अनुभूयते। अस्याः समस्यायाः समाधानहेतोः - दृश्यान्तरालेषु संगीतकस्य प्रयोगः सहायको भविता। आपाततः वक्तुं शक्यते यत् प्रस्तुतिः रमणीया वर्तते, नाटकस्य पूर्वाभ्यासः समधिको भवति चेत्, प्रस्तुतिरियं नूनं रमणीयतरा वर्तिता।

**[ ६ ] रत्नावली**

भारतीयेतिहासे हर्षवर्धनो नाम सुप्रसिद्धो राजा। तस्य नाम्ना ‘रत्नावली’ति नाटिका सुप्रसिद्धास्ति। अस्यां चतुरङ्कान्वितायां शृङ्गार-रसाप्लुतायां नाटिकायां नायकोस्ति उदयनः नायिका च रत्नावली। आहोस्वित् नायको धीर-ललितः नायिका च मुग्धेति वक्तुं शक्यते।

उत्तराखण्डे देवप्रयाग-स्थितस्य श्रीरघुवीरकीर्ति-परिसरस्य छात्रैः नाटिकेयम् नाट्य-स्पर्धायामस्याम् अभिनीता। एवमनुभूयते यत् किमपि अभिनवं वा इतरापेक्षया किञ्चित् पृथक् करणीयमिति समीहमानाः छात्रनटाः निर्देशकाश्च नान्द्यवसरे एव विभिन्न-चरित्रोपस्थापनहेतोः सुदीर्घकालं यापयन्ति। अस्यां प्रस्तुतावपि, एवं हि नान्दी-प्रस्तुतौ प्रायेण अष्ट-निमेषमितो कालो यापितः। प्रस्तुतौ यद्यपि विभिन्न-दृश्यानाम् अभिनयाङ्कनं शोभनमासीत्, तथापि वासवदत्तायाः वाचिकाभिनये एकरूपता अभिलक्षिता। सा प्रत्येकमपि सम्वादान्तं तुल्य-स्वरावरोहेण समापयति। अत एवाहं प्रथम-प्रस्तुतेः [१] तापस-वत्सराज-चरितम्] समीक्षावसरे परामृशम् यत् वाचिकाभिनयार्थं, प्रयोक्ष्यमाणस्य नाटकस्य पूर्वाभ्यासावसरे आहोस्वित् तत्पूर्वं दिवस-द्वयात्मिका वा दिन-त्रयात्मिका एका कार्यशाला आयोज्यते चेत् नूनं तत् भद्रत्वाय कल्पिष्यते। श्रीरघुवीरकीर्ति-परिसरस्य शोभनेयं प्रस्तुतिः अभ्यासेन परिष्कारेण चेतः परमपि शोभनतरा भविष्यतीति आशासे।

**[ ७ ] शिखाबन्धनम्**

आचार्येण रामाशिश-पाण्डेयेन विरचिते ‘शिखाबन्धन’मिति नाटके सुख्यातस्य विष्णुगुप्त-चाणक्यस्य नन्दवंशोत्पाटनविषयिणी इतिहास-प्रसिद्धा कथा नाना-घटना-क्रमैः गुम्फितास्ति। त्रिपुरा-राज्ये अगरतला-स्थितस्य एकलव्य-परिसरस्य विद्यार्थि-वृन्देन ‘शिखाबन्धन’मितिनाटकमत्र नाट्य-स्पर्धायां कुशलतया रोचकरीत्या च प्रयुक्तम्। नान्दी-प्रस्तुतेः सङ्कल्पना नयनाभिरामाद्य राज्ञः नन्दस्य सभायाः दृश्यावसरे पृष्ठभूमौ श्रूयमाणं सङ्गीतं कस्मिंश्चित् पाश्चात्य-रागे [धुन्-इत्यत्र] आधृतमासीदिति प्रतीयते स्म। इतर-दृश्येषु चन्द्रगुप्तस्य बालक्रीडा, चाणक्य-द्वारा शिष्यरूपेण तस्याङ्गीकारः, नन्दसभायां

पञ्चभिः नर्तकीभिः सरसं मनोहरञ्च नृत्यं, नृत्यान्ते विषकन्यया नन्दवधः प्रभृतीनि शोभनानि आसन्। अस्य नृत्य-गीतस्य संयोजनमपि सम्यक्तया व्यवस्थापित- मासीत्, परञ्च पार्श्व-सङ्गीत-प्रभाव-हेतोः प्रयोज्यमानस्य स्वरोत्पादक- [synthesizer]- यन्त्रस्य सततं सञ्चालनं बहुधा कर्णकटुः अनुभूयते स्म। एवं हि, आहार्य-सन्धारण-विषयेपि विशेषावधानं परमावश्यकम्। राज्याभिषेकावसरे चाणक्येन चन्द्रगुप्तस्य शिरसि स्थापितस्य शिरोवेष्टनस्य [उष्णीषस्य] भूमौ अवपतनं रसभङ्गाय कल्प्यते। नाटकेस्मिन् चाणक्यस्य विषकन्यायाश्च अभिनयः सर्वान् अतिशेते। सम्पूर्णोपि नाट्यप्रयोगः सुतरां श्लाघ्यतरः वर्तते। नाट्य-वृन्दाय अभिनन्दनानि।



**[ ८ ] अभिषेकनाटकम्**

त्रिदिवसात्मिकायाः संस्कृत-नाट्यस्पर्धायाः द्वितीय-दिवसान्ते अन्तिमम् आसीत्- महाकवि-भास-प्रणीतम् अभिषेक-नाटकम्। कर्नाटक-राज्ये शृङ्गेरीस्थितस्य श्रीराजीव-गान्धि-परिसरस्य विद्यार्थिव्रातेन नाटकमिदम् अत्र प्रयुक्तम्। 'सर्वं चारुतरं वसन्ते' इति-सुभाषिताधारेण वक्तुं शक्यते यदस्य नाट्य-प्रयोगस्य सर्वमपि चारुतरं वर्तते। नाट्य-प्रयोगेस्मिन्पात्रचयनम्, आङ्गिक-वाचिकाहार्य-सात्त्विकाभिनय-संहतिः, संगीतकम्, प्रकाश-व्यवस्था, मञ्चानम्यता, क्षिप्रं पात्र-परिवर्तन-प्रावीण्यं, पात्रानुकूलाभिनयकौशलं, निर्देशन-दाक्षिण्यमित्यादीनि बहूनि वैशिष्ट्यानि सन्ति।



विशिष्टतया सामान्य-दृश्येषु विमानारूढस्य बालिनः परलोकगमनम्, नद्याः दृश्योपस्थापनम्, हनुमतः समुद्र-सन्तरणम्, अशोकवाटिकायां राक्षसी-राक्षसानाम् उग्रतरः कोलाहलः, हनुमता अशोक-वाटिकायाः अवधूननमित्यादीनि मनोहराणि रोचकाणि च सन्ति।



एवं सत्यपि केचन परिष्कार-बिन्दवो वर्तन्ते येषाम् परिहारार्थं नट-निर्देशकैः गम्भीरतया अवधेयम्। यथा 'शिखाबन्धनम्' इत्यत्र सङ्केतितं 'एवं हि, आहार्य-सन्धारण-विषयेपि विशेषावधानं परमावश्यकम्।' तथैव, मिथः सम्वादावसरे दशाननस्य अन्यतरं हस्त-कङ्कणं च्युतं जायते, दृश्यान्तरे अपरस्य हस्तस्य कङ्कणमपि च्योतते। एवं हि, दृश्यान्तरे, रावणः वेदिकायाः पार्श्वे यदा स्वीयां मञ्च-गतिं विस्मरति तदा, शङ्कुकर्णः स्वीय-यष्टिका-स्पर्श-सङ्केतेन तमग्रेसरणार्थं स्मारयति। एताः क्षुद्राः त्रुटयः कठोर-पूर्वाभासेन अपाक्रियन्ते चेत्, नाटकमिदम् उत्तमोत्तमं भवति।



किमधिकं वक्तव्यम्?दशाननस्य दशमुखानां दृश्यं, वानर-सेनाभिः साकं श्रीरामस्य समुद्र-सन्तरणं, युद्धस्य मन्दगत्या [in slow & motion] प्रदर्शनम्- प्रभृतीनि विशिष्टानि अद्भुतानि च दृश्य-संयोजनानि सहृदयानां नूनं चेतोहराणि जायन्ते। सुस्मरणीयेयं प्रस्तुतिः।

**[ ९ ] मध्यम-व्यायोगः**



अस्याःत्रिदिवसात्मिकायाःसंस्कृत-नाट्यस्पर्धायाः तृतीये अन्तिमे च दिवसे [१०-०३-२०१९] प्रातः प्रथमं भोपाल-परिसरीयैः छात्र-नटैः महाकवि-भास-प्रणीतः 'मध्यम-व्यायोगः' इति रूपकभेदोभिनीतः। सुप्रसिद्धास्ति अस्य व्यायोगस्य कथा। नान्दी-पाठानन्तरं निज-तरुण-पुत्र-त्रयेण पत्न्या च साकं कश्चन ब्राह्मणः रङ्गमञ्चं प्रविशति। सर्वे च घटोत्कचाभिधाद् राक्षसाद् भीतभीताः सन्ति। ततः निज-रक्षायाः कमपि उपायम् अनुपलभ्य जरठो ब्राह्मणो घटोत्कचमेव स्वीय-मुक्तेः समुपायं पृच्छति। स चैवं वदति यन्मम जनन्याः पारणार्थं निज-कुटुम्बात् यदि एकं कमपि दास्यसि तर्हि शेषैः सह







सक्षेमं जीवितुं शक्ष्यसि। ब्राह्मण-पुत्रः मध्यमः स्व-गुरुभक्ति- परिचयं ददन् स्वयमेव राक्षसम् अनुसर्तुं प्रस्तुतः।

अस्याः प्रस्तुतेः केचन स्मरणीयाः प्रशंसनीयाः च पक्षाः -

[१] नान्दी-प्रस्तुतौ भगवतः नारायणस्य वामनावतारः प्रदर्शितः, युगपदेव विपरिवर्ति-दृश्यमाध्यमेन [with reverse-effect] हिडिम्बा-घटोत्कचयोः उपस्थितिः प्रभाविनी जाता। निर्देशकः नान्दी-माध्यमेन रूपकस्य भावि-कथावस्तु निर्दिशति।

[२] भीमस्य प्रवेशानुपदमेव मञ्चोपरि व्यायामानुष्ठानं निर्देशकस्य रचनात्मिकां प्रवृत्तिं द्योतयति।

[३] घटोत्कचस्य वाचिकाभिनयः दर्शकान् प्रभावयति यतो ह्यसौ आधारस्वरेण [through base & voice] सम्वादान् उच्चारयति।

अत एवाहं प्रथम-षष्ठ-प्रस्तुत्योः तापस-वत्सराज-चरितम्, रत्नावली-इत्यनयोः समीक्षावसरे परामृशम्यत्वाचिकाभिनयार्थं, प्रयोक्ष्यमाणस्य नाटकस्य-पूर्वाभ्यासावसरे आहोस्वित्तत्पूर्वं दिवसद्वयात्मिका वादिनत्रयात्मिका एकाकार्यशाला आयोज्यतेचेत्नूनं तत्भद्रत्वाय कल्पिष्यते।

[४] भीम-घटोत्कचयोः बाहुयुद्धावसरे तौ मिथः हस्तौ न स्पृशतः। मञ्चोपरि युद्ध-दृश्यावसरे पदचापगतेः [चारी-choreography] प्रदर्शनं सम्यक्तयाविधीयते चेत्, दृश्यं प्रभावकं सिद्ध्यति। अत्रेदं निर्देशकेन प्रमाणितम्।

[५] नाटकान्ते, घटोत्कचः ब्राह्मण-दम्पतीं प्रणमति, तदा सर्वेपि तत्कौटुम्बिकाः भीताः इव अभिनयन्ति। दृश्यमिदं सुतरां हास्यवर्धकम्।

अस्याः प्रस्तुतेः केचन अवधेयाः परिष्करणीयाः च पक्षाः -

[१] अशेष-रङ्ग-प्रयोगावसरे पृष्ठभूमौ ध्वन्यङ्कितं [recorded music] सङ्गीतम् अतितरां तारस्वरेण [louder] वाद्यते स्म, येन कुशीलवैः समुच्चारितानां सम्वादानां श्रवणं सततं बाधायते स्म।

[२] भीमस्य मञ्चोपरि व्यायामानुष्ठानावसरे दक्षिण-कर्णस्य कुण्डलम् अवपतति।

[३] घटोत्कचस्य केशाः सुवर्णिताः [पीताः] इत्यत्र कश्चन आशयो विशेषो वा?

[४] सामान्यतया भीमः सर्वदैव गदाधारी इति। अत्र मञ्चोपरि नासौ एकवारमपि गदां बिभर्ति।

एवं हि, आपाततो वक्तुं शक्यते यत् भोपाल-परिसरीयैः छात्र-नटैः सम्प्रस्तुता 'मध्यम-व्यायोगः' इति प्रस्तुतिः उत्तमासु अन्यतमासीत्। सर्वेपि कुशीलवाः अभिनन्दनीयाः।

**[१०] वेणीसंहारः**

लोक-विख्यातां महाभारतीयां कथामाधृत्य भट्टनारायणेन लिखिते षडङ्के 'वेणीसंहारः' इति नाटके वृकोदरो भीमः स्वीयां प्रतिज्ञां परिपूरयितुं दुःशासनेन सभायाम् आकृष्टानां द्रौपदी-केशानां गदया चूर्णितस्य दुर्योधनोरू-युगलस्य शोणितेन बन्धनं करोति [द्रौपदी-केशान् संहरति] अतः इदं 'वेणीसंहारः'इति नाटकम्। अज्ञातवासे परिपूर्णे युधिष्ठिरो दुर्योधनेन सह सन्धेः निज-प्रस्तावं बोधयितुं भगवन्तं श्रीकृष्णं शान्तिदूत-रूपेण हस्तिनापुरं प्रति प्रेषयति। सन्धि-प्रस्तावेन स्व-वेणी-संहारम् असम्भवं मन्यमाना खिन्ना द्रौपदी भीमसेनेन समाश्वास्यते यत् अहं वेणीसंहारम् अवश्यं करिष्यामि, राजा [युधिष्ठिरः]

यदि सन्धिमिच्छति चेत्, तदा करोत्वेवम्, अहन्तु दुर्योधनोरूयुगलं भेत्स्यामि एव।

संस्थानस्य जयपुर-परिसरीया: विद्यार्थिन: अत्र नाटकमेनत् प्रयुक्तवन्त:। अस्या: प्रस्तुते: केचन विशिष्टा: दुर्बलाश्च पक्षा: सन्ति ते नूनम् अत्रावधेया:-

[१] नान्द्या: संकल्पना नयनरम्या। नाट्यारम्भे मङ्गल: शङ्ख-ध्वनि:। तिरस्करिणी- [curtain]-युगल-त्रयेण रङ्गभूमि: सज्जीकृतास्ति। एतासु यवनिकासु श्वेत-द्वयम्, अश्वेत-द्वयम् ईषत्-श्वेत-द्वयं च सन्ति। आत्मानं गोपयित्वा कुशीलवै: धृता: सन्ति एता: यवनिका: [पटी-वस्त्राणि]। अपि च, उभयथा वार्णिका: [द्विवार्णिका:] एता: यवनिका: अत: दृश्य-रसानुकूलं परिवर्तनं कृत्वा कामपि आनन्द-वर्धिनीं प्रभाविनीञ्च चमत्कृतिमुत्पादयितुमर्हन्ति नटा:।

[२] विविध-दृश्य-बन्धेषु पटीनां रङ्ग-प्रयोगोयं सुतरां प्रभावक:, सहृदयानाञ्च कृते कौतुकानन्द-वर्धक:।

[३] भीमसेन: [नायक:] प्रविशति। दृश्य-परिवर्तनेस्मिन् षण्णामपि पटीनाम् सततम् आवर्तनमध्ये अभिनेतृप्रवेश: रसचमत्कारं जनयति।

[४] दुर्योधन: [प्रतिनायक:] किञ्चित् तिरञ्चीभूतानां कृष्णरक्तपटीनां पृष्ठभूमौ प्रविशति, एवं हि निर्देशक: अप्रत्यक्षरूपेण चरित्रचित्रणं विधाय निजकौशलं ख्यापयति।

[५] एतासु यवनिकासु त्रयेण देवालयप्रतिकृतिं निर्मीय दुर्योधनार्चनं विधीयते।

[६] आसां पटीनाम् अवधूननै: भूकम्प-प्रभाव: रुचिरो जात:।

[७] जवनिका-द्वयस्य अन्यतरस्यां 'रुधिरप्रिय:', अपरस्याञ्च 'वसागन्धा' इति राक्षसौ रुधिरपानं कुर्वन्तौ मिथ: संलापेन द्रोणस्य जयद्रथस्य घटोत्कचस्य च वधं सूचयत:। दृश्यमिदं किञ्चित् दीर्घायितं जातं येन दर्शका: नीरसताम् अनुभवन्ति।

[८] सात्यकी-अङ्गराज-कर्णयो: वाग्युद्धम् अपि दीर्घतरं सत् नीरसम् अनुभूतम्।

[९] ऊरु-भङ्ग-दृश्यं विपरिवर्तिनि श्वेत-पटे प्रतिबिम्ब-[reflect]-माध्यमेन प्रदर्शितं तद्धि प्रभावकं सिद्धम्।

[१०] नाट्यारम्भे यथा मङ्गल: शङ्ख-ध्वनि: भवति तद्वदेव नाटकान्ते च शङ्ख-ध्वनि-पुरस्सरं श्रीकृष्ण: प्रविशति, पृष्ठभूमौ 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत!' इति श्रीमद्भगवद्गीताया: श्लोकध्वनि: दर्शकान् प्रभावयति।

[११] अर्जुन:, नकुल:, सहदेवश्च कृष्ण-यवनिकाया: वेणीं विरचयन्ति, तत्र भीमसेन: रक्तपटीं संयोज्य रक्तवर्णेन 'वेणीसंहारं' सार्थीकरोति।

एवं हि, आपातत: वक्तुं शक्यते यत् जयपुरीया इयं प्रस्तुति: सुतरां शोभना हृदयावर्जिका च सिध्यति।

**[ ११ ] नागानन्दम्**

अस्यां त्रिदिवसात्मिकायां षोडश्यां संस्कृत-नाट्यस्पर्धायाम् आहत्य एकादश- संस्कृत-रूपकाणि प्रयुक्तानि एतेषु अन्तिमा एकादशीया श्रीहर्षदेव-प्रणीता "नागानन्दम्" इति प्रस्तुति: श्रीगुरुवायूर-परिसरीयै: छात्र-नटै: प्रयुज्यते। "नागानन्दम्" इति नाटके प्रायेण सर्वाण्यपि चरित्राणि अतिमानवीयानि [super&human] सन्ति। नायक: जीमूतवाहन: विद्याधरराजस्य जीमूतकेतो: पुत्र:। स च पित्रारोपितं राज्यभारं त्यक्त्वा पितृचरण-सेवार्थं सुहृदा विदूषकेण सह वनं निर्याति।

राष्ट्रिय-संस्कृत-संस्थानस्य अन्त:परिसरीया अनुपमा मनोहारिणी च षोडशी संस्कृत-नाट्यस्पर्धा नूनं स्मरणीया वरीवर्ति। सौभाग्याद् अहम् अन्यतमाम् अगरतलीयां [त्रिपुरराज्ये] स्पर्धां विधाय सर्वासामपि स्पर्धानाम् अधिकृत: द्रष्टास्मि। आरम्भादेव श्रीगुरुवायूर-परिसरीया: नाट्य-प्रस्तुतय: उत्तमा: दर्शनीया: भरत-नाट्य-शास्त्रानुकूला: च वर्तन्ते। अत: "नागानन्दम्" इत्यस्य समीक्षायाम् इदमेव उच्यते यद् आङ्गिक:, वाचिक:, आहार्य:, सात्त्विकश्चेति चतुर्विधोभिनय: छात्रै: अत्र कुशलतया प्रदर्शित:। अस्य नाटकस्य कुशीलवै: स्वीय-योग्यतानुरूपं सुतरां समीचीनं प्रयतितम्, तथापि आरम्भादेव इदमनुभूयते यत् मलयालम्-भाषिण: केरलीया: तवर्गीयानां वर्णानां स्पष्टतया उच्चारणे सहजतया किञ्चित् काठिन्यमनुभवन्ति। अत: नाट्य-प्रयोगेस्मिन् वाचिकाभिनयार्थं समधिकम् अभ्यसनीयम् अवशिष्यते। एतदर्थं, प्रयोक्ष्यमाणस्य नाटकस्य पूर्वाभ्यासावसरे आहोस्वित् तत्पूर्वं दिवस-द्वयात्मिका वा दिन-त्रयात्मिका कार्यशाला आयोज्यते चेत् नूनं तत् भद्रत्वाय कल्पिष्यते। अन्ते चेदमेव उक्त्वा उपसंह्रियते यत् राष्ट्रिय-संस्कृत-संस्थानस्य अन्त:परिसरीया एषा संस्कृत-नाट्य-स्पर्धा निर्विघ्नं प्रवर्धतां सम्वर्धतां विवर्धताञ्च।

# राष्ट्रियसंस्कृतसंस्थानेन प्रस्तुतानां रूपकाणां सूची

**प्रथमः वसन्तोत्सवः ( 3-4 मार्च, 2004 ) स्थानम्- डॉ. अम्बेडकरप्रेक्षागृहम्, आन्ध्रभवनम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 1. भगवदज्जुकीयम्, गुरुवायूरपरिसरः, 2. सभिकद्यूतकरम्, भोपालपरिसरः, 3. जागरूको भव, लखनऊपरिसरः 4. कर्णभारम्, श्रीराजीवगान्धीपरिसरः, 5. संस्कृतोद्गारम्, रणवीरपरिसरः, 6. मुद्राराक्षसम्, गरलीपरिसरः, 7. अभिज्ञानशाकुन्तलम्, जयपुरपरिसरः, 8. मदनदहनम्, सदाशिवपरिसरः।

**द्वितीयः वसन्तोत्सवः ( 1-2 मार्च, 2005 ) स्थानम्- डॉ. कमानीप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 9. कर्णाश्वत्थामीयम्, जयपुरपरिसरः, 10. चारुदत्तम्, श्रीराजीवगान्धीपरिसरः, 11. चम्पकरामः, गुरुवायूरपरिसरः, 12. राष्ट्रं नः प्राणाः, रणवीरपरिसरः, 13. उरुभङ्गम्, गरलीपरिसरः, 14. दूतवाक्यम्, लखनऊपरिसरः, 15. यमराजकीयम्, के.जे. सोमैय्याविद्यापीठम्, 16. कृतककौमुदम्, भोपालपरिसरः।

**तृतीयः वसन्तोत्सवः ( 23-24 फरवरी, 2006 ) स्थानम्- डॉ. कमानीप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 17. अश्वत्थामा, मुख्यालयः, 18. नागानन्दम्, गुरुवायूरपरिसरः, 19. मध्यमव्यायोगः, लखनऊपरिसरः, 20. मत्तविलासप्रहसनम्, भोपालपरिसरः, 21. दूतघटोत्कचम्, गरलीपरिसरः, 22. अबलासामर्थ्यम्, गङ्गानाथझापरिसरः, 23. मृच्छकटिकम्, श्रीराजीवगान्धीपरिसरः, 24. स्नुषाविजयम्, जयपुरपरिसरः, 25. देहि पादपल्लवमुदारम्, सदाशिवपरिसरः, 26. भूकैलाशम्, के.जे. सोमैय्याविद्यापीठम्, 27. सुभद्राहरणम्, रणवीरपरिसरः।

**चतुर्थः वसन्तोत्सवः ( 20-22 फरवरी, 2007 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 28. दुर्योधनम्, मुख्यालयः, 29. स्वप्नवासवदत्तम्, गुरुवायूरपरिसरः, 30. हास्यचूडामणिः, लखनऊपरिसरः, 31. प्रतिज्ञाश्वत्थामीयम्, भोपालपरिसरः, 32. राजवैभवम्, सदाशिवपरिसरः, 33. प्रसन्नराघवम्, श्रीराजीवगान्धीपरिसरः, 34. पञ्चरात्रम्, गरलीपरिसरः, 35. बालभारतम्, जयपुरपरिसरः, 36. चाणक्यविजयम्, रणवीरपरिसरः, 37. रघुदासस्य पत्रम्, गंगानाथझापरिसरः, 38. विक्रमोर्वशीयम्, के.जे. सोमैय्याविद्यापीठम्।

**पञ्चमः कौमुदीमहोत्सवः ( 28-30 नवम्बर, 2007 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 39. कौरवौरवम्, मुख्यालयः, 40. अभिषेकनाटकम्, श्रीराजीवगान्धीपरिसरः, 41. मालविकाग्निमित्रम्, गुरुवायूरपरिसरः, 42. त्रिपुरदाहः, भोपालपरिसरः, 43. लटकमेलकम्, जयपुरपरिसरः, 44. भर्तृहरिनिर्वेदम्, सदाशिवपरिसरः, 45. चण्डकौशिकम्, लखनऊपरिसरः, 46. कर्पूरमञ्जरी, गरलीपरिसरः, 47. धूर्तसमागमः, गङ्गानाथझापरिसरः, 48. अविमारकम्, रणवीरपरिसरः, 49. मदनकेतुचरितम्, के.जे. सोमैया- विद्यापीठम्, 50. यक्षगानम्-सुधन्वमोक्षः, श्रीराजीवगान्धीपरिसरः।

**षष्ठः कौमुदीमहोत्सवः ( 24-26 नवम्बर, 2008 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 51. यक्षगानम्, मुख्यालयः, 52. पञ्चकल्याणी, गुरुवायूरपरिसरः, 53. आश्चर्य-चूडामणिः, श्रीराजीवगान्धीपरिसरः, 54. सीताच्छायम्, भोपालपरिसरः, 55. सावित्रीचरितम्, रणवीरपरिसरः, 56. प्रतिज्ञायौगन्धरायणम्, जयपुरपरिसरः, 57. रत्नावली, गरलीपरिसरः, 58. गौरीदिगम्बरप्रहसनम्, गङ्गानाथझापरिसरः, 59. विवाहविडम्बनम्, लखनऊपरिसरः, 60. उत्तररामचरितम्, सदाशिवपरिसरः, 61. राष्ट्रं रक्षति रक्षितम्, के.जे. सोमैयाविद्यापीठम्, 62. मालविकाग्निमित्रम्, कालिदास संस्कृत अकादमी, उज्जैन (आमन्त्रितप्रस्तुतिः), 63. भगवदज्जुकीयम्, नीपारङ्गमण्डली, लखनऊ (आमन्त्रितप्रस्तुतिः)।

**सप्तमः कौमुदीमहोत्सवः ( 10-12 नवम्बर, 2009 ) स्थानम्- प्यारेलालप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 64. रासलीला, श्रीराधामाधवसंस्कृतमहाविद्यालयः, मणिपुरम् (आमन्त्रितप्रस्तुतिः), 65. अभिज्ञानशाकुन्तलम् (प्रथमाङ्कः), भोपालपरिसरः 66. प्रतिमानाटकम्, सदाशिवपरिसरः, 67. अभिज्ञानशाकुन्तलम् (द्वितीयाङ्कः), रणवीरपरिसरः, 68. अभिज्ञानशाकुन्तलम् (तृतीयाङ्कः), गरलीपरिसरः, 69. अभिज्ञानशाकुन्तलम् (चतुर्थाङ्कः), श्रीराजीवगान्धीपरिसरः, 70. इन्द्रजालम्, गङ्गानाथझापरिसरः, 71. विक्रमोर्वशीयम्, नाट्यपरिषद्, सागरम् (आमन्त्रितप्रस्तुतिः), 72. अभिज्ञानशाकुन्तलम् (पञ्चमाङ्कः), लखनऊपरिसरः, 73. अभिज्ञानशाकुन्तलम् (षष्ठाङ्कः), गुरुवायूरपरिसरः, 74. अभिज्ञानशाकुन्तलम् (सप्तमाङ्कः), जयपुरपरिसरः, 75. कुन्दमाला, कमलवशिष्ठस्य आमन्त्रिता प्रस्तुतिः।

**अष्टमः कौमुदीमहोत्सवः ( 25-27 अक्टूबर, 2010 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 76. कर्णभारम्, गुरुवायूरपरिसरः, 77. मध्यमव्यायोगः, जयपुरपरिसरः 78. पञ्चरात्रम्, के. जे. सोमैय्याविद्यापीठम्, 79. प्रतिज्ञायौगन्धरायणम्, भोपालपरिसरः, 80. दूतवाक्यम्, गङ्गानाथझापरिसरः, 81. दरिद्रचारुदत्तम्, गरलीपरिसरः, 82. स्वप्नवासवदत्तम्, श्रीराजीवगान्धीपरिसरः, 83. बालचरितम्, श्रीसदाशिवपरिसरः, 84. अविमारकम्, लखनऊपरिसरः, 85. प्रतिमानाटकम्, श्रीरणवीरपरिसरः।

**नवमः कौमुदीमहोत्सवः ( 30 जनवरी, 2012 तः 01 फरवरी, 2012 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 86. उत्तररामचरितम्, श्रीसदाशिवपरिसरः, 87. प्रशान्तराघवम्, गङ्गानाथझापरिसरः, 88. कुन्दमाला, जयपुरपरिसरः, 89. प्रसन्नराघवम्, भोपालपरिसरः, 90. बालरामायणम्, श्रीरणवीरपरिसरः, 91. अभिषेकनाटकम्, के.जे. सोमैय्याविद्यापीठम्, 92. सीताराघवम्, श्रीराजीवगान्धीपरिसरः, 93. प्रतिमानाटकम्, श्रीवेदव्यासपरिसरः, 94. महावीरचरितम्, लखनऊपरिसरः, 95. आश्चर्यचूडामणिः, गुरुवायूरपरिसरः।

**दशमः नाट्यमहोत्सवः ( 05-07 फरवरी, 2013 ) स्थानम्- एल.टी.जी. प्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 96. मुद्रितकुमुदचन्द्रम्, गङ्गानाथझापरिसरः, 97. मल्लिकामकरन्दम्, श्रीसदाशिवपरिसरः, 98. मृच्छकटिकम् (1-2 अङ्कौ), श्रीराजीवगान्धीपरिसरः, 99. मृच्छकटिकम् (3-5 अङ्काः), गुरुवायूरपरिसरः, 100. मृच्छकटिकम् (6-7 अङ्कौ), श्रीवेदव्यासपरिसरः, 101. मृच्छकटिकम् (8 अङ्कः), श्रीरणवीरपरिसरः, 102. मृच्छकटिकम् (9-10 अङ्कौ), लखनऊपरिसरः, 103. मालतीमाधवम्, जयपुरपरिसरः, 104. कौमुदीमित्रानन्दप्रकरणम्, के.जे. सोमैयाविद्यापीठम्, 105. प्रबुद्धरौहिणेयम्, भोपालपरिसरः।

**एकादशः नाट्यमहोत्सवः ( 01-03 फरवरी, 2014 ) स्थानम्- हिन्दूमहाविद्यालयप्रेक्षागृहम्, नवदेहली।**

प्रस्तुतानि रूपकाणि : 106. प्रमद्वरा, गङ्गानाथझापरिसरः, 107. चन्द्रकला, श्रीसदाशिवपरिसरः, 108. वृषभानुजा, भोपालपरिसरः, 109. मृगाङ्कलेखा, के.जे. सोमैयाविद्यापीठम्, 110. मणिमञ्जरी, श्रीरणवीरपरिसरः, 111. विद्योत्तमा, श्रीवेदव्यासपरिसरः, 112. अनारकली, एकलव्यपरिसरः, 113. कर्पूरमञ्जरी, श्रीराजीवगान्धीपरिसरः, 114. प्रियदर्शिका, लखनऊपरिसरः, 115. रत्नावली, जयपुरपरिसरः, 116. शृङ्गारमञ्जरी, गुरुवायूरपरिसरः।

**द्वादशः नाट्यमहोत्सवः ( 04-06 फरवरी, 2015 ) स्थानम्- शङ्करहॉलकन्सर्टप्रेक्षागृहम्, दिल्लीविश्वविद्यालयः, नवदेहली।**

प्रस्तुतानि रूपकाणि : 117. मुद्राराक्षसम् (1-3 अङ्काः), गङ्गानाथझापरिसरः, 118. मुद्राराक्षसम् (4-7 अङ्काः), गुरुवायूरपरिसरः, 119. बालभारतम्, श्रीराजीवगान्धीपरिसरः, 120. मालतीमाधवम् (1-3 अङ्काः), लखनऊपरिसरः,

121. मालतीमाधवम् (4-7 अङ्काः), भोपालपरिसरः, 122. मालतीमाधवम् (8-10 अङ्काः), के.जे. सोमैया विद्यापीठम्, 123. बालरामायणम् (1-3 अङ्काः), श्रीवेदव्यासपरिसरः, 124. बालरामायणम् (4-7 अङ्काः), श्रीरणवीरपरिसरः, 125. बालरामायणम् (8-10 अङ्काः), जयपुरपरिसरः, 126. महावीरचरितम् (1-4 अङ्काः), श्रीसदाशिवपरिसरः, 127. महावीरचरितम् (5-7 अङ्काः), एकलव्यपरिसरः।

**त्रयोदशः नाट्यमहोत्सवः (24-26 फरवरी, 2016) स्थानम्- डॉ. सर्वेपल्ली- राधाकृष्णन्प्रेक्षागृहम्, केन्द्रीयविद्यालयः (03), दिल्लीकेंट, नवदेहली।**

प्रस्तुतानि रूपकाणि : 128. लटकमेलकम्, श्रीरणवीरपरिसरः, 129. वञ्चकपञ्चकम्, एकलव्यपरिसरः, 130. कुहनाभैक्षवम्, श्रीवेदव्यासपरिसरः, 131. मृदङ्गदासप्रहसनम्, श्रीगङ्गानाथझापरिसरः, 132. स्नुषाविजयम्, लखनऊपरिसरः, 133. हास्यार्णवप्रहसनम्, श्रीसदाशिवपरिसरः, 134. पलाण्डुमण्डनम्, जयपुरपरिसरः, 135. मत्तविलासः, गुरुवायूरपरिसरः, 136. विवाहविडम्बनम्, के.जे. सोमैया विद्यापीठम्, 137. हास्यचूडामणिः, भोपालपरिसरः, 138. भगवदज्जुकीयम्, श्रीराजीवगान्धीपरिसरः।

**चतुर्दशः नाट्यमहोत्सवः (27 फरवरी तः 1 मार्च, 2017) स्थानम्- डॉ. सर्वेपल्ली- राधाकृष्णन्प्रेक्षागृहम्, केन्द्रीयविद्यालयः (03), दिल्लीकेंट, नवदेहली।**

प्रस्तुतानि रूपकाणि : 139. छत्रपतिसाम्राज्यम् (1-5 अङ्काः), वेदव्यासपरिसरः, 140. छत्रपतिसाम्राज्यम् (6-10 अङ्काः), श्रीरणवीरपरिसरः, 141. पण्डितराजीयम्, श्रीराजीवगान्धीपरिसरः, 142. अङ्गुष्ठदानम्, एकलव्यपरिसरः, 143. लीलाभोजराजम्, गङ्गानाथझापरिसरः, 144. दाम्पत्यकलहम्, श्रीरघुनाथकीर्तिपरिसरः, 145. रक्षाबन्धनम्, श्रीसदाशिवपरिसरः, 146. मदनमोहनमालवीयकीर्तिमञ्जरीनाटकम्, लखनऊपरिसरः, 147. संयोगितास्वयंवरम्, गुरुवायूरपरिसरः, 148. प्रतापविजयम्, जयपुरपरिसरः, 149. स्नेहसौवीरम्, के.जे. सोमैयासंस्कृतविद्यापीठम्, 150. तण्डुलप्रस्थीयम्, भोपालपरिसरः।

**पञ्चदशः नाट्यमहोत्सवः (22 नवम्बर तः 24 नवम्बरः, 2017) स्थानम्- राष्ट्रियसंस्कृतसंस्थानम्, एकलव्यपरिसरः, अगरतला।**

प्रस्तुतानि रूपकाणि : 151. विख्यातविजयम्, लखनऊपरिसरः, 152. विवेकानन्दविजयम्, क.जे. सोमैयासंस्कृतविद्यापीठम्, 153. सीताराघवम्, गुरुवायूरपरिसरः, 154. उदात्तराघवम्, वेदव्यासपरिसरः, 155. चैतन्यचन्द्रोदयम्, श्रीरणवीरपरिसरः, 156. लक्ष्मीमानवेदम्, श्रीरघुनाथकीर्तिपरिसरः, 157. बाणहरणम्, श्रीसदाशिवपरिसरः, 158. सुभद्राधनञ्जयम्, श्रीराजीवगान्धीपरिसरः, 159. राघवाभ्युदयम्, एकलव्यपरिसरः, 160. किरातार्जुनीयव्यायोगः, जयपुरपरिसरः, 161. प्रेमपीयूषम्, भोपालपरिसरः।

**षोडशः नाट्यमहोत्सवः (08 मार्च तः 10 मार्चः, 2019) स्थानम्- राष्ट्रियसंस्कृतसंस्थानम्, गुरुवायूरपरिसरः, केरलम्।**

प्रस्तुतानि रूपकाणि : 162. तापसवत्सराजचरितम्, श्रीरणवीरपरिसरः, 163. भारतविजयम्, वेदव्यासपरिसरः, 164. दरिद्रचारुदत्तम्, क.जे. सौमेयापरिसरः, 165. शान्तामङ्गलम्, सदाशिवपरिसरः, 166. कुन्दमाला, लखनऊपरिसरः, 167. रत्नावली, श्रीरघुनाथकीर्तिपरिसरः, 168. शिखाबन्धनम्, एकलव्यपरिसरः 169. अभिषेकनाटकम्, श्रीराजीवगान्धीपरिसरः, 170. मध्यमव्यायोगः, भोपालपरिसरः, 171. वेणीसंहारम्, जयपुरपरिसरः, 172. नागानन्दम्, गुरुवायूरपरिसरः।

❖❖❖

# षोडशनाट्यमहोत्सवस्य कानिचन चित्राणि

























# राष्ट्रिय-संस्कृत-संस्थानम्

(मानव संसाधन विकास मन्त्रालय, भारत सरकार के तत्त्वावधान में संस्थापित मानित विश्वविद्यालय)
राष्ट्रिय-मूल्यांकन-प्रत्यायन-परिषद् द्वारा 'ए' श्रेणी में प्रत्यायित
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
दूरभाष : 011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in website : www.sanskrit.nic.in